चीवरम्" भा० आ० ६१अ०। "अबलाखल्पकौपीनाः सुहृदः सव्यजिष्णवः" भा०अनु०४६अ०। [रूपकोषः।

**कौपोदकी** स्त्री कौमोदकी पृषो०। विष्णुगदायां हि-

**कौमार** पु० अपूर्व्वपतिकां कुमारीमुपपन्नः पतिः "कौमारापूर्व्ववचने" पा० नि०। अपूर्व्वपतिकायाः कुमार्य्याः १वोढरि। कुमारस्य भावः "प्राणभृद्वयो वचनत्वात् अञ्। "जातः कुं पृथिवीं यस्मात् मारयेत् स कुमारकः। इति प्रधानतो विद्धि कौमारं प्रागभवार्वदतः" इत्युक्तावधिके "कौमारं पञ्चमावधि" इत्यन्ते २वयोवस्थाभेदे न०। "देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा" गीता। "पिता रक्षति कौमारे भर्त्ता रक्षति यौवने" मनुः। कुमार एव स्वार्थे अण्। ३कुमारे शब्दचिन्ता०। कुमारस्य सनत्कुमारस्येदम् अण्। ४सर्गभेदे पु० स च सर्गः सनत्कुमारादिसर्ज्जनपूर्व्वकत्वात् तन्नामकः। "कौमार आर्षः प्राजापत्योमानव इत्यादि सर्गनामानि" श्रीधरः। "सएव प्रथमं देवः कौमारं सर्गमाश्रितः। चचार दुश्चरं ब्रह्मा ब्रह्मचर्य्यमखण्डितम्" भाग० १,३,७, "वैकारिकस्तु यः प्रोक्तः "कौमारस्तूभयात्मकः" भाग० ३,१०,२०,५, ५कुमारसम्बन्धिनि त्रि० "तत विद्याव्रतस्नातः कौमारं व्रतमास्थितः" भा० व० ६५अ०

**कौमारायण** पुंस्त्री० कुमारस्य गोत्रापत्यं नड़ा० फक्। कुमारनामकर्षिगोत्रापत्ये। [कानीने

**कौमारिकेय** पुंस्त्री० कुमारिकाया अपत्यं शुभ्रा० ढक्।

**कौमारी** स्त्री अपत्नीकं कुमारं पतिमुपपन्ना स्त्री "कौमारापूर्व्ववचने" पा०नि०ङीप्। १अगृहीतदारान्तरस्य पत्युः १भार्य्यायाम्। कुमारस्येयमण् ङीप्। २कुमार सम्बन्धिचेष्टादौ "कौमारीं दर्शयंश्चेष्टाम्" भाग०२,२,२८, कुमारस्य कार्त्तिकेयस्येयम् अण् ङीप्। ३कार्त्तिकेयशक्तौ। "कौमारी शक्तिहस्ता च मयूरवरवाहना। योद्धुमभ्याययौ क्रुद्धं रक्तवीजं महासुरम्" कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः" देवीमाहात्म्यम्

**कौमुद** पु० "कौ मोदन्ते जनायस्मिन् कौमुदस्तेन कीर्त्तितः" इत्युक्तलक्षणे १कार्त्तिकमासे। "एतैरन्यैश्च राजेन्द्रैः पुरा मांसं न भक्षितम्। शारदं कौमुदं मासं ततस्ते स्वर्गमाप्नुयुः। कौमुदं तु विशेषेण शुक्लपक्षं नराधिप!। वर्ज्जयेत् सर्वमांसानि धर्म्मोह्यत्र विधीयते" म०त०भार०

**कौमुदी** स्त्री कुमुदस्येयं प्रकाशकत्वात् प्रिया अण् ङीप्। १ज्योत्स्नायाम् अमरः। "शशिना सह याति कौमुदी" कुमा०१तद्वत्प्रकाशिकायाम् "त्वमस्य लोकस्य च नेत्रकौमुदी" कुमा० कौमुदस्येयम् अण् ङीप्। "कुशब्देन मही ज्ञेया मुद हर्षे० ततोद्वयम्। धातुज्ञैर्नियमैश्चैव तेन सा कौमुदी स्मृता" इत्युक्तायां २कार्त्तिकपौर्णमास्यां "कौ मोदन्ते जनायस्यान्नानाभावैः परस्परम्। हृष्टास्तुष्टाः सुखापन्नास्तेन सा कौमुदी मता" इत्युक्तायाम् ३आश्विनपौर्णमास्याम् "आश्विने पौर्णमास्यान्तु चरेज्जागरणं निशि कौमुदी सा समाख्याता कार्य्या लोकविभूतये" ति० त० लिङ्गोक्तेः। ४दीपोत्सवतिथौ दीपोत्सवतिथिं प्रक्रम्य भविष्योत्तरे "कौ मोदन्ते जनायस्यां तेन सा कौमुदी मता" "सखीजनोद्वीक्षणकौमुदीमुखम्" रघुः कौमुदी दीपोत्सवतिथिः" इति मल्लि०"५उत्सवे धरणिः" ६कार्त्तिकोत्सवे त्रिका०। स्वार्थे क। ह्रस्वे कौमुदिका ज्योत्स्नायाम्। संज्ञायां कन्। उमासखीभेदे शब्दरत्ना० कुमुद+चतुरर्थ्यां कुमुदा० ठक्। कौमुदिक कुमुदसन्निकृष्टदेशादौ त्रि०

**कौमुदीचार** पुंन० कौमुद्या ज्योत्स्नाया चारः प्राशस्त्यमत्र काले। आश्विनपौर्णमास्याम् त्रिका०

**कौमुदीपति** पु० ६त०। चन्द्रे हारा०कौमुदीनाथादयोऽप्यत्र

**कौमुदीवृक्ष** पु० कौमुद्याः प्रकाशिकायाः दीपशिखाया वृक्ष इवाधारः। दीपवृक्षे (पिलसुज) हारा०

**कौमोदकी** स्त्री कोः पृथिव्याः पालकत्वात् मोदकः कुमोदको विष्णुः तस्येयम् अण्। विष्णुगदायाम् अमरः "कौमोदकी मोदयति स्म चेतः" माघः। "दैवैरनादिवीर्य्यस्य गदा तस्यापरे करे। निक्षिप्ता कुमुदाक्षस्य नाम्ना कौमुदकीति सा" हरि० ८२अ०

**कौमोदी** स्त्री कुं मोदयति अण् कुमोदः विष्णुस्तस्येयमण् ङीप्। विष्णुगदायाम् शब्दरत्ना०

**कौम्भकारि** पुंस्त्री० कुम्भकारस्यापत्यं शिल्पित्वात् पक्षे इञ्। कुम्भकारापत्ये स्त्रियां वा ङीप्। पक्षे अञ्। कौम्भकार्य्यं तत्रार्थे।

**कौम्भायन** त्रि० कुम्भस्य सन्निकृष्टदेशादि पक्षा० फक्। कुम्भसन्निकृष्टदेशादौ [ष्टदेशादौ

**कौम्भायनि** त्रि० कुम्भ+चतुरर्थ्यां कर्णा०फिञ्। तत्सन्निक-

**कौम्भेयक** त्रि० कुम्भ्यां जातादि कत्त्र्या० ढकञ्। कुम्भीजातादौ [कृष्टदेशादौ

**कौम्भ्य** त्रि० कुम्भ+चतुरर्थ्यां सङ्काशा० ण्य। कुम्भसन्नि-

**कौरयाण** पु० कुरयाणस्य (शत्रुं प्रति कृतयानस्य) अयम् अण् भेदे पृषो०। शत्रुं प्रति कृतयानस्य सम्बन्धिनि तत्पुत्रादौ